नारद उवाच ।।

इति तस्य मुनींद्रस्य भूपतिः शुश्रुवान्वचः ।
प्राह नाहं गमिष्यामि त्वां विहाय[1] नरं क्वचित् ।। १

लिंगमाराधयिष्येऽद्य सर्वसिद्धिप्रदं नृणाम् ।
त्वयैवानुगृहीतोऽद्य यांतु सर्वे यथागतम् ।। २

तद्भूपतिवचः श्रुत्वा बको गृध्रोऽथ कच्छपः ।
उलूकश्च तथैवोचुः प्रणता[2] लोमशं मुनिम् ।। ३

स च सर्वसुत्यद्विप्रस्तथेत्येवाह तांस्तदा ।
प्रणीयान्प्रणतान्सर्वाननुजग्राह शिष्यवत् ।। ४

शिवदीक्षा विधानेन लिंगपूजां [3]समादिशत् ।।
तेषामनुग्रहं चैव मुनिः प्रणतवत्सलः ।।
तीर्थादप्यधिकं स्थाने सतां च साधुसमागमः ।। ५

पचेलिमफलः सद्यो दूरितकलुषापहः ।
अपूर्वः कोऽपि सद्गोष्टि सहस्त्रकिरणोदयः ।। ६

य एकांततयात्यंतमंतर्गततमोऽपहः ।
साधु गोष्ठिसमुद्भूत सुखामृतरसोर्मयः[4] ।। ७

---

१ अ. विहाये
२ ब लोम मुनिं ब. पाठः ।
३ ब. समादिशत्
४ अ. ब. सुखामृतरसादसी

सर्वे वशः सुधाकाराः शर्करामधुषाङ्सा ।
ततस्ते साधुसंसर्गं संप्राप्ताः शिवशासनात् ।। ८

आरेभिरे क्रियायोगं मार्कंडनृपपूर्वकाः ।।
तेषां तपस्यतामेवं समाजग्मे कदाचन ।
तीर्थयात्रानुषांगेण लोभशालोकनोत्सुकः ।। ९

मुख्या पुरुषायात्रा हि तीर्थयात्रानुषांगतः ।।
सद्भिः समाश्रिवती भूप भूमिभागस्तथोच्यते ।। १०

कृतार्हणातिथ्यविधं विश्रांतं मां च फाल्गुन ।।
प्रणम्य तेऽथ पप्रच्छुर्नाडीजंघपुरः सराः ।। ११

ते उचुः ।।
शापभ्रष्टा वयं ब्रह्मश्रीवत्चारीऽपि स्वकर्मणा ।
तन्मुक्ति साधनार्थाय स्थानं किंचित्समादिश[1] ।। १२

इयं हि निष्फिला भूमिः सफलं भारतं मुने ।। १३

तत्रापि क्वचिदेकत्र सर्वतीर्थफलं वद ।
इति पृष्ठस्त्वहं तैश्च तानब्रवमिदं तदा ।। १४

---

१ अ. ब. दिशे

संवर्तं परिपृच्छध्वं स वक्ष्यति तत्त्वतः ।
सर्वतीर्थफलावाप्तिकारकं भूप्रदेशकम् ।। १५

त उचुः ।।
कुत्रासौ विद्यते योगी नाज्ञासिषम वयं च तम् ।।
संवर्तदर्शनान्मुक्तिरिति चास्मदनुग्रहः ।। १६

यदि जानासि तं ब्रूहि सुत्दत्संगो न निष्फलः[1] ।
ततोऽहमब्रवं तांश्च विचार्येदं पुनः पुनः ।। १७

वाराणस्यामसावास्ते संवर्तो गुप्तलिंगभृत् ।
मलदिग्धो विवसनो भिक्षाशी कृतपार्दनु ।। १८

करपात्र कृताहारः सर्वथा निष्परिग्रहः ।
भावयन्ब्रह्म परमं प्रणवाभिधमीश्वरम् ।। १९

भुक्ता निर्याति सायाह्ने वनं न ज्ञायते जनैः ।
योगीश्वरोऽसौ तद्रूपाः सन्त्यन्ये लिंगधारिणः ।। २०

वक्ष्यामि लक्षणं तस्य यथा ज्ञास्यथ तं[2] मुनीम् ।
प्रतोलया राजमार्गेतु निशि भूमौ शवं जनैः ।। २१

---

१ अ. लः
२ अ. ते

अविज्ञातं[1] स्थापनीयं स्थैर्यं तदविदूरतः ।
यस्तां भूमिमुपागम्य अकस्माद्विनिवर्तते ।। २२

स संवर्तो न चाक्रामत्येष्य शत्रुमसंशयम् ।
[2]पृष्टव्योऽभिमतं चासावुपाश्रित्य विनीतवत् ।। २३

यदि पृच्छति केनाहमाख्यायति इति मां ततः ।
निवेद्य चैतद्वक्तव्यं त्वामाख्यायाग्निमाविशत् ।। २४

तच्छ्रुत्वा ते तथा चक्रुः सर्वेऽपि[3] वचनं मम ।
प्राप्य वाराणसीं दृष्टवा संवर्तं ते तथा व्यधुः ।। २५

शवं दृष्टवा ब च तैर्न्यस्तं संवर्तो वै न्यवर्तत ।।
क्षुत्परीतोऽपि त्वं ज्ञात्वा ययुस्तमनु शीघ्रगम् ।। २६

तिष्ठ ब्रह्मन्क्षणमिति जल्पंतो राजमार्गगम् ।
याति निर्भर्त्स्य यत्येष निवर्तध्वमिति ब्रुवन् ।। २७

समया मामरे भोऽद्य नागंतव्यं न वो हितम् ।
पलायनमसौ कृत्वा[4] गत्वा दूरतरं सरः ।।
कुपितः प्राह तान्सर्वान्केनाख्यातोऽहमित्युत ।। २८

---

१ अ. अज्ञातं
२ ब. पृष्टव्यो
३ अ. सप्तापि
४ अ. प्रतौ "ब्रह्मन" पाठः

निवेदयत शीघ्रं मे यथा भस्म करोमि तम् ।
शापाग्निनाथ वा युष्मान्यदि सत्यं न वक्ष्यथ ।। २९

अथ प्रकंपिताः प्राहुर्नारयेनेति ते मुनिम्[१] ।।
स तानाह[२] पुनर्यातिः पिशुनः क्व नु संप्रति ।। ३०

लोकानां येन शापाग्नौ भस्मशेषो करोमि तम् ।।
बहुमबंधुमहं प्राहुर्भीतास्ते ते पुनर्मुनिम् ।। ३१

त ऊचुः ।।[३]
त्वां विवेद्य स च चास्माकं प्रविष्टो हव्यवाहनम् ।
तत्कालमेव विप्रेंद्र न विद्मस्तत्र कारणम् ।। ३२

संवर्त उवाच ।।
अहमप्येवमेवास्य कर्ता तेन स्वयं कृतम् ।।
तद्ब्रूत कार्यं नैवात्र चिरं स्थास्यामि वः कृते ।। ३३

अर्जुन उवाचः ।।
यदि नारद देवर्षे प्रविष्टो/सि हुताशनम् ।
जीवितस्तत्कथं भूयं आश्चर्यमिति मे वद ।। ३४

नारद उवाच ।।
न हुताशः समुद्रो वा वायुर्वावृक्षपर्वतः[४] ।
आयुधं वा नमेरे शक्ता देहपाताय भारत ।। ३५

---

१ ब मुनि ह २ ब. तानिह
३ अ. ते सर्वे उचुः ।। ब. ते उचुः ।।
४ अ. ब. पर्वताः

पुनरेतत्कृतं चापि संवर्तो मन्यते यथा ।।
अर्हं[1] सन्मानितश्चेति वह्निं प्राप्याप्यगामहम् ।। ३६

यथा पुष्पगृहे कश्चित्प्रविशत्यंग फाल्गुन ।।
तथाऽहमग्निं संविश्य यातवानुत्तरं शृणु ।। ३७

संवर्तस्तान्पुनः प्राह मार्कंडेय मुखानिति ।।
विशल्यः क्रियतां पंथाः क्षुधितोऽहं पुनः पुरीम् ।। ३८

त ऊचुः ।।
शापभ्रष्टा वयं मोक्षं प्राप्स्यामस्त्वदनुग्रहात् ।।
प्रतीकारं तदाख्याहि प्रणतानां महामुने ।। ३९

यत्र तीर्थे सर्वतीर्थफलं प्राप्नोति मानवः ।।
तत्तीर्थं ब्रूहि संवर्त तिष्ठामो यत्र वै वयम् ।। ४०

संवर्त उवाच ।।
नमस्कृत्य कुमाराय दुर्गाभ्यश्च नरोत्तमाः[3] ।।
तीर्थं च संप्रवक्ष्यामि महीसागरसंगमम् ।। ४१

अमुना राजसिंहेन इंद्रद्युम्नेन धीमता ।।
यजनाद्यर्थं ऽगुलोत्सेधा कृतेयं वसुधा यदा[4] ।। ४२

---

१ ब. आर्हं
२ ब. मै
३ अ. ब. मा
४ अ. महीयदा

तदा[1] संताप्यमानाय भुवः काष्ठस्य ते यथा ।।
सुस्त्राव यो जलौघश्च सर्वदेवनमस्कृतः ।। ४३

महीनाम नदी सा च पृथिव्यां यानि कानिचित् ।।
तीर्थानि तेषां सलिल संभवं तज्जलं विदुः ।। ४४

महीनाम समुत्पन्ना देशे[2] मालव[3]काभिधे ।।
दक्षिणी सागरं प्राप्ता पुण्योभयतटा शिवा ।। ४५

सर्वतीर्थमयी पूर्वं महीनाम महानदी ।।
किं पुनर्यः समायोगस्तस्याश्च सरितां पतेः ।। ४६

वाराणसी कुरुक्षेत्रे गंगा रेवा सरस्वती ।। ४७

तापी पयोष्णी निर्विंध्या चन्द्रभागा इरावती ।।
कावेरी [4]शरयूश्चैव गंडकी नैमिषं तथा ।। ४८

गया गोदावरी चैव अरुणा वरुणा तथा ।।
एता पुण्याः शतशोन्या याः काश्चित्सरितो भुवि ।। ४९

---

१ ब. प्रतौ नास्ति ।
२ अ. देशात् बं देश
३ अ. ब '..... काभिधात्
४ अ. सरयू.....

सहस्त्र विंशतिश्चैव षाट्शतानि तथैव च ।।
तासां सार समुद्भूतं महीतीर्थं प्रकीर्तितम् ।। ५०

पृथिव्यां सर्वतीर्थेषु स्नात्वा यत्फलमाप्यते ।।
तन्महीसागरे प्रोक्तं कुमारस्य वचो यथा ।। ५१

एकत्र सर्वतीर्थानां यदि संयोगमिच्छथ ।।
तद्गच्छथ महापुण्यं महीसागरसंगमम् ।। ५२

अहं चापि च तत्रैव बहून्वर्षगणान्पुरा ।।
[1]अवसं चागतश्चात्र नारदस्य भयात्तथा ।। ५३

स हि तत्र समीपस्थः पिशुनश्च विशेषतः ।।
मरुतः [2]कुरुते [3] यत्नं तस्मै ब्रूयादिदं भयम् ।। ५४

अत्र दिग्वाससां मध्ये बहूनां तत्समस्त्वहम् ।।
निवसाम्यति प्रच्छन्नो मरुतादतिभीतवत् ।। ५५

पुनरत्रापि मां नूनं कथयिष्यति नारदः ।।
तथाविधा हि चेष्टास्य पिशुनस्य प्रदृश्यते ।। ५६

---

१ ब. अवश्यं

२ अ. कल्पते

३ अ. यज्ञं

भवद्भिर्मिश्रैश्च न चाप्यत्र वक्तव्यं कस्यचित्क्वचित् ।।
मरुतः कुरुते यत्नं भूपालो यज्ञसिद्धये ।। ५७

देवाचार्येण संत्यक्तो भ्रात्रा मे कारणांतरे ।।
गुरुपुत्रं[१] च मां ज्ञात्वा यज्ञार्त्विज्यस्य कारणात् ।। ५८

अविद्यांतर्गतैर्यज्ञकर्मभिर्न प्रयोजनम् ।।
मर्मं हिंसात्मकैरस्ति निगमोत्कैर चेतनैः ।। ५९

समित्पुष्प कुशप्रायैः साधनैर्यद्य चेतनैः ।।
क्रियते तत्तथा भावि कार्यं कारणवन्नृणाम् ।। ६०

तद्धूयं तत्र गच्छध्वं शीघ्रमेव नृपानुगाः ।।
अस्ति विप्रः स्वयं ब्रह्मा याज्ञवल्क्यश्च तत्र वै ।। ६१

स हि पूर्वं[२] मिथैः पुर्यां वसन्नाश्रममुत्तमम् ।।
आगच्छमानं नकुलं दृष्ट्वा गार्गीवचोऽब्रवीत् ।। ६२

गार्गि रक्ष पयो भद्रे नकुलोऽयमुपेति च ।।
३(पयः) पातुं कृतिमतिं नकुलं तं निराकुरु ।। ६३

---

१ अ ब. गुरुपत्रं
२ ब. पूर्वा
३ "पयः" मुद्रित पुस्तके नास्ति ।

इत्युक्तो नकुलः क्रुद्धः स हि क्रुद्धः[1] पुराऽभवत् ।।
जमदग्नेः पूर्वजैश्च शप्तः प्रोवाच तं मुनिम् ।। ६४

अहो वा धिग्धिगित्येव भूयो धिगिति चैव हि ।।
निर्लज्जता मनुष्याणां दृश्यते पाप[2]कारिणाम् ।। ६५

कथं ते नाम पापानि प्रकुर्वंति नराधमाः ।।
मरणांतरिता येषां नरके तीव्रवेदना ।। ६६

निमेषोऽपि न शक्यते जीवितं यस्यनिश्चितम् ।।
तन्मात्रपरमायुर्यः पापं कुर्यात्कथं स च ।। ६७

त्वं मुने मन्यसे चेदं कुलीनोऽस्मीति बुद्धिमान् ।।
ततः क्षिपसि मां मूढ नकुलोऽयमितिस्मयन् ।। ६८

किमधीतं याज्ञवल्क्य का योगेश्वरता तव ।।
निरपराधं[3] क्षिपसि धिगधीतं हि तत्तव ।। ६९

कस्मिन्नवेदे स्मृतौ कस्यां प्रोक्तमेतद्ब्रवीहि मे ।।
[4]पुरुषीरिति वाक्यैमां नकुलेति ब्रवीषि मत् ।। ७०

---

१ अ. ब. क्रोधः
२ अ. कर्मणाम्
३ अ. निरापराधं
४ अ. पुरुषी

किमिदं नैव जानासि यावत्त्वः परुषा गिरः ।।
परः श्राव्यते तावच्छंकवः श्रोत्रतः पुरा ।। ७१

कंठे यमानुगाः पादं कृत्वा तस्य सद्युमतिः ।।
अतीव रुदतो लोहशंकून्क्षेप्स्यंति कर्णयोः ।। ७२

वावदूकाश्रुव ध्वजिनो मुष्णंति कृपणाञ्जनान् ।।
स्वयं हस्तसहस्त्रेण धर्मस्यैवं भवद्विधाः ।। ७३

वज्रस्य दिगृधशस्त्रस्य कालकूटस्य चाप्युत ।।
समेन वचसा तुल्यै मृत्योरिति ममाभवत् ।। ७४

कर्णनासिक[1]नाराचान्निर्हरंति शरीरतः ।।
वाक्छल्यस्तु न निर्हर्तिं शक्यो त्दहिशयो हिसः ।। ७५

यंत्रपीडैः समाकृम्य वरमेष्ठा हतो नरः ।।
न तु तैं परुषैर्वाक्यै र्जिघांसित कथंवचन ।। ७६

त्वया त्वहं याज्ञवल्क्य[2] नित्यं पंडितमानिना ।।
नकुलोसीति तीव्रेण वचसा ताडितः कृतः ।। ७७

---

१ अ. कर्णनालीक
२ ब. याज्ञवल्कयस्तु

संवर्त[1] उवाच ।।

इति श्रुत्वा वचस्तस्य भृशं विस्मितमानसः ।।
याज्ञवल्क्यो ऽब्रवीदेतत्प्रबद्धकर संपुटः ।। ७८

नमो ऽधर्माय महते न विदुर्मो यस्य वै भवम्[2] ।।
परमाणुमपि व्यक्तं कोत्र विद्यामदः सताम् ।। ७९

विरंचि विष्णु प्रमुखाः सोमेंद्रप्रमुखास्तथा ।।
सर्वज्ञास्ते ऽपि मुह्यति गणनास्मादृशो च का ।। ८०

धर्मसो ऽस्मीति यो मोहाद्दात्मानं प्रतिपद्यते ।।
स वायुं मुष्टिना बद्धमीहते कृपणो नरः ।। ८१

केचिदज्ञानतो नष्टाः केचिज्ज्ञानमदादपि ।।
ज्ञानं प्राप्यापि नष्टाश्च केचिदालस्यतो ऽधमाः ।। ८२

वेदस्मृतीतिहासेषु पुराणेषु प्रकल्पितम् ।।
चतुः पादं तथा धर्मं नाचरत्यधमः पशुः[3] ।। ८३

स पुरा शोचते व्यक्तं प्राप्य तच्चांतकं गृहम् ।।
तथाहि गृह्यकारेण श्रुतो प्रोक्तमिदं वचः ।। ८४

---

१ ब. प्रतौ "उवाच" पाठः नास्ति ।
२ अ. वयं
३ अ. पशुः

नकुलं सकुलं ब्रूयान्न कंचिन्मर्मणि स्पृशेत् ।।
प्रपठन्नपि[1] चैवाहमिदं सर्वं तथा शुकः[2] ।। ८५

आलस्येनाप्यनाचाराद्वृथा कार्यैकर्मग तत् ।। ८६

केवलं पाठ मात्रेण यश्च संतुष्यति नरः ।।
तथा पंडितमानी च कोन्यस्तस्मात्पशुर्मतः ।। ८७

नच्छंदासि वृजिनात्तारयंति मायाविनं वर्तमानम् ।।
नीडं शकुंता इव जातपक्षाश्छंदास्येनं प्रजहत्यंतकाले ।। ८८

स्वर्गाय बद्धकक्षा यः पाठमात्रेण ब्राह्मणाः ।।
स बालो मातुरंकस्थो ग्रहीतुं सोममिच्छति ।। ८९

~~तद्भवान्सर्वथा वदत्येवं तन्मयैव मुदाहृतम् ++~~
तद्भवान्सर्वथा मह्यमनयं सोढु[3]मर्हसि ।।
सर्वः कोऽपि वदत्येवं तन्मयैव मुदाहृतम् ।। ९०

नकुल उवाच ।।
वृथेदं भाषिते तुभ्यं सर्वलोकेन यत्समम् ।।
आत्मानं मन्यसे नैतद्वक्तुं योग्य महात्मनाम् ।। ९१

---

१ अ. प्रपन्नमपि

२ अ. श्रुकः

३ अ. ब. मर्हति

व्याघ्रजिवारणलोहानां काष्ठपाषाण वाससाम् ।।
नारीपुरुष तोयानामंतरं महदंतरम् ।। ९२

अन्ये चेत्प्राकृता लोका बहुपापानि कुर्वते ।।
प्रधान पुरुषेणापि कार्यं [1]तत्पृष्ठतोनुकिम् ।। ९३

सर्वार्थं [2]निर्मितं शास्त्रं मनोबुद्धि तथैवच ।।
दत्ते विधात्रा[3] सर्वेषां तथापि यदि पापिनः ।। ९४

ततो विधातुः को दोषास्त एव खलु दुर्भगाः ।।
ब्राह्मणेन विशेषेण किं भाव्यं लोकवद्यतः ।। ९५

यद्यदाचरति श्रेष्ठस्ततदेवेतरो जनः ।।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।। ९६

तस्मात्सदा महद्भिश्च आत्मार्थं च परार्थतः ।।
सतां धर्मोन संत्याज्यो न्याय्यं वच्छिक्षणंतिव ।। ९७

यस्मात्त्वया पीडितोऽहं घोरेण वचसा मुने ।।
तस्माच्छीघ्रं त्वां[4] शप्स्यामि शापयोग्यो हि मे मतः ।। ९८

---

१ ब. तत्पुष्ठेतान किं
२ ब. सवर्थि
३ अ. विधाता
४ अ. प्रतौ नास्ति

नकुलोऽसीति मामाह भवांस्तस्मात्कुलाधमः ।।
शीघ्रमुत्पत्स्यसे मोहात्त्वमेव नकुलो मुने ।। ९९

संवर्त[1] उवाच ।।
इति वाचं समाकर्ण्य [2]भाव्यकृत निश्चयः ।।
याज्ञवल्क्यो मरौ देशे विप्रस्याजायतात्मजः ।। १००

दुराचारस्य पापस्य निघृणस्यातिवादिनः ।।
दुष्कुलीनस्य जातोऽसौ तदा जातिस्मरः सुतः ।। १०१

सोऽथ ज्ञानात्समालोक्य भर्तृयज्ञ इति द्विजः[3] ।।
गुप्तक्षेत्रं समापन्नो महीसागर-संगमम् ।। १०२

तत्र पाशुपतो भूत्वा शिवाराधनतत्परः ।।
स्वायंभुवे महाकालं पूजयन्वर्ततेऽधुना ।। १०३

यो हि नित्यं महाकालं श्रद्धया पूजयेत्पुमान् ।।
स दौष्कुलीन दोषेभ्यो मुच्यते हिरिवत्त्वचः ।। १०४

यथा यथा श्रद्धयासौ तल्लिंगं परिपश्यति ।।
तथा तथा विमुच्येत दोषैर्जन्म[4]शतोद्भवैः ।। १०५

---

१ ब. प्रतौ "उवाच" नास्ति ।
२ अ. सभाव्य
३ अ. "द्विजं"
४ ब. सत्मुद्भवैः ।

भर्तृयज्ञस्तु तत्रैव[१] लिंगस्याराधनात्क्रमात् ।।
बीजदोषाद्वि निर्मुक्तस्त ऽ ल्लिंगमहिमात्वसौ ।। १०६

बभ्रुं[२] च नकुलं प्राह विमुक्तो[३]दुष्टजन्मतः ।।
यस्मात्तस्मादियं तीर्थं ख्याति वैबभ्रुपावनम् ।। १०७

तस्माद्बुजर्ध्वं तत्रैव महीसागरसंगमम्[४]।।
पंच तीर्थानि सेवन्तो मुक्तिमाप्स्यथ निश्चितम्।। १०८

इत्येवमुक्त्वा संवर्तो ययावभिमतं द्विजः ।।
भर्तृयज्ञं मुनिं प्राप्य ते च तत्र स्थिताभवन् ।। १०९

ततस्तानाह स ज्ञात्वा गणांज्ञानेन शांभवान् ।।
महद्वो विमलं पुण्यं गुप्तक्षेत्रे यदत्र वै ।। ११०

भवन्तोऽभ्यागता यत्र महीसागरसंगमः ।।
स्नानं दानं जपो होमः पिंडदानं विशेषतः।। १११

~~अक्षयं जायते सर्व स्नानदान[५]क्रियादिकम्-++~~
अक्षयं जायते सर्व महीसागर संगमे ।।
कृतं तथाऽक्षयं सर्वं स्नानदान[५]क्रियादिकम् ।। ११२

---

१ अ. तस्यैव । ब. तत्रैव ।
२ ब. ब्रभ्रं
३ अ. दुःकुलीनतः
४ अ. ब. संगमे
५ अ. जपादिकं ।।

यदात्र स्थानकं चक्रे देवर्षिर्नारदः पुरा ।।
तदा ग्रहैर्वरा प्रत्ताः शनिना च वरस्तुवसौ ।। ११३

शनैश्चरेण[1] संयुक्ता त्वमावास्या यदा भवेत् ।।
श्राद्धं तत्र प्रकुर्वीत स्नानदान [2]पुरः सरम् ।। ११४

यदि श्रावणमासस्य शनैश्चर दिने शुभा ।।
[3]कुहूर्भवति तस्यां तु संक्रांतिं कुरुते रविः ।। ११५

तस्यामेव तिथौ योगो व्यतीपातो भवेद्यदि ।।
पुष्करं नाम तत्पर्व सूर्यपर्वशताधिकम् ।। ११६

सर्वयोग समावापः[4] कथंचिदपि लभ्यते ।।
तस्मिन्दिने शनिं लोहकांचनं भास्करं तथा ।। ११७

महीसागर संसर्गे पूजयीत[5] यथाविधिः ।।
शनि मंत्रैः शनिं ध्यात्वा सूर्यमंत्रैर्दिवाकरम् ।। ११८

अर्घ्यं दद्याद्भास्करस्य सर्वपापप्रशांतये ।।
प्रयागादधिकं स्नानं दानं क्षेत्रात्कुरोरपि ।। ११९

---

१ अ. शनिवारेण
२ अ. पुरस्सरः ।।
३ अ. कथं
४ अ. समादाय
५ ब. पूजयित्वा

पिंडदानं गयाक्षेत्रादधिकं पांडुनंदन ।।
इदं संप्राप्यते पर्व महद्भिः पुण्य राशिभिः ।। १२०

पितृणामक्षया तृप्तिर्जायते दिवि निश्चितम् ।।
यथा गयाशिरः पुण्यं पितृणां तृप्तिदं परम् ।। १२१

तथा समधिकः पुण्यो महीसागर संगमः ।। १२२

अग्निश्च रेतोमृडया च देहे रेतोधा विष्णुरमृतस्य नाभिः ।।
एवं [1]ब्रुवंछ्रद्धया[2] सत्यवाक्यं ततोऽवगाहेत महीसमुद्रम् ।। १२३

मुखं च यः सर्वनदीषु पुण्यः [3]पाथोधिरंबा प्रवरामही च ।।
समस्ततीर्थाकृतिरेतयोश्च ददामि चार्घ्यं प्रणमामि नौमि ।। १२४

४ ताम्रारस्याः पयोवाहाः पितृप्रीतिप्रदाः शुभाः ।।
सस्यमाला महासिन्धुर्दातुर्दात्री पृथुस्तुता ।। १२५

महीवर्णा महीशृंगा गंगा पश्चिमवाहिनी ।।
नदी राजनदी चेति नामाष्टादश मालिकाम् ।। १२६

---

१ अ. एत
२ ब. ब्रुवन्श्रद्धया
३ अ. पयोधि ....
४ अ. १२५ । १२८ पर्यन्तं त्रुटितं ।

स्नानकाले च सर्वत्र श्राद्धकाले पठेन्नरः ।।
पृथुनोक्तानि नामानि यज्ञमूर्ति पदं व्रजेत् ।। १२७

महीदोहे महानंदसंदोहे विश्व[1]मोहिनि ।।
जातासि सरितां राज्ञि पापं हर महीद्रवे ।। १२८

इत्यर्घ्यमंत्रः ।।[2]
कंकणं रजतस्यापि योऽत्र निक्षिपते नरः ।।
स जायते महीपृष्ठे धनधान्ययुते कुले ।। १२९

मही च सागरं चैव रौप्यकंकण पुजया ।।
पूजयामि भवेन्मा मे द्रव्यनाशो दरिद्रता ।। १३०

कंकणक्षेपणम् ।।[3]
यत्फलं सर्वतीर्थेषु सर्वयज्ञेषु यत्फलम् ।।
तत्फलं स्नान दानेन महीसागरसंगमे ।। १३१

विवादे च समुत्पन्ने अपराधी च यो मतः ।।
जलहस्तः[4] सदा[5]वाच्यो महीसागरसंगमे ।। १३२

संस्नाप्याऽघोरमंत्रेण स्थाप्य नाभि प्रमाणके ।।
जले करं समुद्धृत्य दक्षिणां वाचयेद्धृतम् ।। १३३

---

१ ब. जीविनि ।।
२ अर्घ्यः अ. ब. पाठः ।
३ अ. ब. क्षेपनं
४ अ. हस्तं
५ अ. समा

यदि धर्मोऽत्र सत्योऽस्ति सत्यश्रुतसंगमस्त्वसि ।।
सत्याश्रुतकृतुद्रष्यरः सत्यंस्थान्मे शुभाशुभम् ।। १३४

एवमुक्ता करं क्षिप्य दक्षिणं सकलं ततः ।।
निः सृतः पापकारी चेज्ज्वरेणापीडयते क्षणात् ।। १३५

सप्ताहादृश्यते चापि तावन्निदोर्ष्वान्मतः ।।
अत्र स्नात्वा च जप्त्वा च तपस्तप्त्वा तथैव च ।। १३६

रुद्रलोकं सुबहवो गताः पुण्येन कर्मणा ।।
सोमवारे[1] विशेषेण स्नात्वा यौत्र सुभक्तितः ।। १३७

पंच तीर्थानि कुरुते मुच्यते पंचपातकैः ।। *
इत्याद्युक्तं बहुविधं तीर्थमाहात्म्यमुत्तमम् ।। १३८

भर्तृयज्ञः शिवस्यो चे तेषामाराधने क्रमम् ।।
शिवागमोक्तमादिस्य पूजायोगं यथाविधि ।। १३९

शिवभक्ति समुद्रैक पूरितः प्राह तान्मुनिः ।।
न शिवात्परमो देवः सत्यमेतच्छिवव्रताः ।। १४०

---

१ अ. सोमग्रहे

* अ. After this sloka, there is written in the M.S.S. —
- इति श्री स्कंदपुराणे कुमारिकाखंडे महीसागर माहात्म्यं ।।
Further slokas are same as in the p.w. But next chapter begins in the M.S.S. - 'A' with -

" नारद उवाच"।। which is not appear in the P.W.

शिवं विहाय यो ह्यन्यदसत्किंचिदुपासते ।।
करस्थं सोऽमृतं त्यक्त्वा मृगतृष्णां प्रधावति ।। १४१

शिवशक्तिमयं[1] ह्येतत्प्रत्यक्षं दृश्यते जगत् ।।
लिंगांकं च भगांकं च नान्य देवांकितंक्वचित् ।। १४२

यश्च ति पितरं रुद्रं त्यक्त्वा मातरमंबिकाम् ।।
वर्तते॒ऽसौ स्वपितरं त्यक्त्वैव पितृ पिंडकः ।।
यस्य[2] रुद्रस्य माहात्म्यं शतरुद्रीयमुत्तमम् ।। १४३

शृणुध्वं यदि पापानामिच्छध्वं क्षालनंपरम् ।।
ब्रह्मा हार्टकलिंगं च समाराध्य कपर्दिनः ।। १४४

जगत्प्रधानमिति च नाम जप्त्वा विराजते ।।
कृष्णमूले कृष्ण लिंगं नाम चार्जितमेव च ।। १४५

सनकाद्यैश्च तल्लिंगं पूजयाजयुर्जगद्गतिम् ।।
दर्भांकुरमयं सप्त मुनयो विश्वयोनिकम् ।। १४६

नारदस्त्वंतरिक्षे च जगद्बीजमिदं गृणन् ।।
वज्रमिंद्रो लिंगमेवं विश्वात्मानं च नाम च ।। १४७

---

१ अ. भक्तिमयं । ब. भक्तिसमं ।
२ अ. ब. तस्य

सूर्यस्ताम्रं तथा लिंगं नाम विश्वसृजं जपन् ।।
चंद्रश्च मौक्तिकं लिंगं जपन्नाम जगत्पतिम् ।। १४८

इंद्र नीलमयं वह्निर्नाम विश्वेश्वरं जपन् ।।
पुष्परागं गुरुर्लिंगं विश्वयोनिं जपन्हरम् ।। १४९

पद्मरागमयं शुक्रो विश्वकर्मेति नाम च[1] ।।
हेमलिंगं च धनदो जपन्नाम्ना तथेश्वरम् ।। १५०

रौप्यजं विश्वदेवाश्च नामापि जगतां पतिम्[2] ।।
वायवो रीतिजं लिंगं शंभुमित्येव नाम च ।। १५१

काशजं वसवो लिंगं स्वयंभुमिति[3] नाम च ।।
त्रिलौहं मातरो लिंगं नाम भूतेशमेव च ।। १५२

लौहं च रक्षसां नाम भूतभव्य भवोद्भवम् ।।
गुह्यकाः सीसजं लिंगं नाम योग जपंति च ।। १५३

जैगीषव्यो ब्रह्मरंध्रं नाम योगेश्वरं जपन् ।।
निमिर्नयनयोर्लिंगे जपं शर्वेति नाम च ।। १५४

---

१ अ. ब. "सः" पाठः ।
२ अ. गतिं
३ अ. भुरिति

धनवंतरिर्म्मोमयं च सर्वलोकेश्वरेश्वरम् ।।
गंधर्वा दारुजं लिंगं सर्व श्रेष्ठिति नाम च ।। १५५

वैडूर्य राघवो लिंगं जगज्जयेष्ठेति नाम च ।।
बाणो मारकतं लिंगं वसिष्ठमिति नाम च ।। १५६

वरुणः स्फाटिकं लिंगं नाम्ना च परमेश्वरम् ।।
नागा विद्रुम लिंगं च नाम लोकत्रयं करम् ।। १५७

भारती तार[१] लिंगं च नाम लोकत्रयाश्रितम् ।।
शनिश्च संगमावर्ते जगन्नाथेति नाम च ।। १५८

शनि देशे मध्यरात्रौ[२] महीसागर संगमे ।।
जातीजं रावणो लिंगं जपन्नाम सुदुर्जयम्[३] ।। १५९

सिद्धाश्च मानसं नाम काममृत्युजरातिगम् ।।
उछ्जं च बलिलिंगं ज्ञानात्मेत्यस्य नाम च ।। १६०

मरीचिपाः[४] पुष्पजं च ज्ञानगम्येति नाम च ।।
शकृताः शकृतं लिंगं ज्ञानज्ञेयेति नाम च ।। १६१

---

१ अ. तालु

२ अ.औ. रात्रौ

३ अ.ब. सुदुर्लभं

४ ब. मरीचिष्पा

फेनपाः फेनजं लिंगं नाम चापि सुदुर्विदम् ।।
कपिलो ऽवालुका लिंगं वरदं च जपन्हरम् ।। १६२

सारस्वतो वाचि लिंगं नाम वागीश्वरेति च ।।
गणामूर्तिमयं लिंगं नाम रुद्रेति चाब्रुवन्[१] ।। १६३

जांबूनदमयं देवाः[२] शिति कण्ठेति नाम च ।।
शंख लिंगं बुधो नाम कनिष्ठमिति संजपन् ।। १६४

अश्विनौ मृन्मयं लिंगं नाम्ना चैव सुवेधसम् ।।
विनायकः पिष्टलिंगं नामृना चापि कपर्दिनम् ।। १६५

नावनीतं कुजो लिंगं नाम चापि करालकम्[३] ।।
तार्क्ष्य औदन ऽ लिंगं च हूर्यक्षेति हि नाम च ।। १६६

गौडं कामस्तथा लिंगं रतिर्ददैचेति नाम च ।।
+ शची लवण लिंगं तु बभ्रुकेशेति नाम च ।। १६७

++ विश्वकर्मा च प्रासादलिंगं याम्येति नाम च ।।
++ विभीषणश्चैव पांसूत्थं सुहृत्तमेति नाम च ।। १६८

---

१ अ. प्रतौ "च प्रभोः" इति स्यात् ।
२ ब. देवा
३ ब. करालयं
+ शची लवण......नाम च "। अ प्रतौ इत्ययं पाठः नास्ति ।
++ विभीषणश्चैव........नाम च ।। ब. प्रतौ श्लोकपंक्ति व्युत्क्रमे ।
विश्वकर्मा...........नाम च ।।

राहुश्चैव रामठं लिंगं नाम गमूयेति कीर्त्तयन् ।।
लप्यलिंगं तथा लक्ष्मीर्हरिनेत्रेति नाम च ।। १६९

यौगिनीः सर्वभूतस्थं स्थाणुरित्यैव नाम च ।।
नानाविधं मनुष्याश्चैव पुरुषनाम नाम च ।। १७०

तेजोमयं च ऋक्षाणि[1] भर्गं नाम च भास्वरम् ।।
किंनरा धातुलिंगं च सुदीप्तमिति नाम च ।। १७१

देवदेवेति नामास्ति लिंगं च ब्रह्मराक्षसाः ।।
दंतजं वारणां लिंगं नाम [2]रंहसमेव च ।। १७२

सप्तलोकमयं साध्या बहुरूपेति नाम च ।।
दूर्वांकुरमयं लिंगमृतवः सर्वनाम च ।। १७३

कौंकुममप्सरसो लिंगं नाम शंभोः प्रियेति च ।।
[3]सिंदूरजं चोर्वशी च नाम च प्रिय[4]वासनम् ।। १७४

ब्रह्मचारि गुरु लिंगं नाम चोष्णीषिणं विदुः ।।
अलक्तकं च योगिन्यो नामचास्य सुबभ्रुकम् ।। १७५

---

१ ब. रक्षाणि
२ ब. रंहंसमेव
३ ब. शंदूरं
४ अ. वासिनं

श्रीखंडं सिद्धियोगिन्यः सहस्त्राक्षीति नाम च ।।
डाकिन्यो मांस लिंगं च नाम चास्य च मीठुष्णम् ।। १७६

अप्यन्नजं च मनवो गिरिशेति च नाम च ।।
अगस्त्यो व्रीहिजं चापि सुशांतमिति नाम च ।। १७७

यवजं देवालो लिंगं पतिमित्येव नाम च ।।
वल्मीकजं च वाल्मीकिश्चिवरवासीति नामच ।। १७८

प्रतर्दनो बाणलिंगं हिरण्यभुजनाम च ।।
राजिकं च तथा दैत्यौ नाम उग्रेति कीर्तितम् ।। १७९

निष्पावजं दानवाश्च लिंगनाम च दिक्पतिम् ।।
मेघा क्षीरमयं लिंगं पर्जन्यपतिनाम च ।। १८०

राजमाषामयं यक्षा नाम भूतपतिं[१] स्मृतम् ।।
तिलान्नजं च पितरो नाम वृषायतिस्तथा ।। १८१

गौतमो गोरजमयं नाम गोपतिरेव च ।।
वानप्रस्थाः फलमयं नाम वृक्षावृतेति च ।। १८२

---

१ अ. पतिः

स्कंदः पाषाणलिंगं च नाम सेनान्य एव च ।।
[1]नागश्वाश्वतरौ धान्यं मध्यमेत्यस्य नाम च ।। १८३

पुरोडाशमयं यज्वा स्त्रुवहस्तेति नाम च ।।
यमः कालाय[2]समयं नाम प्राह च धन्विनम् ।। १८४

यवांकुरं जामदग्न्यो [3]भर्गदैत्येति नाम च[4] ।।
पुरूरवाश्चान्नमयं बहुरूपेति नाम च ।। १८५

मांधाता शर्करा लिंगं नाम [5]बाहुयुगेति च ।।
गावः पयोमयं लिंगं नाम नेत्र सहस्त्रकम् ।। १८६

साध्या भर्तृमयं लिंगं नाम विश्वपतिः स्मृतम् ।।
नारायणो नरो मौजं सहस्त्र शिरनाम च ।। १८७

तार्क्ष्यं पृथुस्तथा लिंगं सहस्त्रचरणाभिधम् ।।
पक्षिण्यो व्योम लिंगं च नाम सर्वात्मकेति च ।। १८८

पृथिवी मेरु लिंगं द्वितनुश्चास्य नाम च ।।
भस्म लिंगं पशुपति[6]र्नाम चास्य महेश्वरः ।। १८९

---

१ अ. नामश्वा....

२ ब. कालोह

३ ब. गर्भदित्यस्य

४ अ. तः

५ "विश्वपतिःस्मृतं" इत्ययं अ प्रतौ पाठान्तरं ।

६ अ. पाशुपता । ब. पाशुपतिं ।

ऋषायो ज्ञानलिंगं च चिरस्थानेति नाम च ॥
ब्राह्मणा ब्रह्म लिंगं च नाम ज्येष्ठेति तं विदुः ॥ १९०

गोरोचनमयं शेषो नाम पशुपतिः स्मृतम् ॥
वासुकिर्विषा लिंगं च नाम वै शंकरेति च ॥ १९१

तक्षकः काल कूटारव्यं[1] बहुरूपेति नाम च ॥
हालाहलं च कर्कोट[2] एकाक्ष इति नाम च ॥ १९२

श्रृंगी विषामयं पद्मोनाम धूर्जटिरेव च ॥
पुत्रः[3] पितृमयं लिंगं विश्वरूपेति नाम च ॥ १९३

पारदं च शिवा देवी नाम त्र्यम्बक एव च ॥
मत्स्याद्याः [4]शास्त्रलिंगं च नाम चापि वृषाकपिः ॥ १९४

एवं किं बहुनोक्तेन यद्यत्सत्त्वं विभूतिमत् ॥
जगत्यामस्ति तज्जातं शिवाराधन योगतः ॥ १९५

भस्मनो[5] यदि वृक्षत्वं ज्ञायते नीरसेवनात् ॥
शिवभक्ति विहीनस्य ततोऽस्य फलमुच्यते ॥ १९६

---

१ ब. कूटाक्षं
२ ब. कर्णाट
३ ब. पुत्र
४ अ. ब. शस्त्रलिंगं
५ ब. भस्मनां

धमर्थि काम मोक्षाणां यदि प्राप्तौ भवेन्मतिः ।।
ततो हरः समाराध्य स्त्रिजगत्याः [1]प्रदो मतः ।। १९७

य इदं शतरुद्रीयं प्रातः प्रातः पठिष्यति ।।
तस्य प्रीतः शिवो देवः [2]प्रदास्यत्या खिलान्वरान् ।। १९८

नातः परं पुण्यतमं किंचिदस्ति महाफलम् ।।
सर्व वेद रहस्यं च सूर्यैणोक्तमिदं मम ।। १९९

वाचा च यत्कृतं पापं मनसा वाप्युवार्जितम् ।।
पापं तन्नाशमायाति कीर्तिते शतरुद्रिये ।। २००

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।।
भवान्मुच्यते भीतश्च जपेद्यः शतरुद्रियम् ।। २०१

नाम्नां शतेन यः कुम्भैः पुष्पैस्तावद्भिरीश्वरम् ।।
प्रणामानं शतेनापि मुच्यते सर्वपातकैः ।। २०२

लिंगानां शतमेतच्चै शतमाराधकास्तथा ।।
नामानि च शतं [3]सर्वदोषसंनाशकंस्मृतम् ।। २०३

---

१ अ. ब. प्रदोमतं

२ ब. प्रादास्य

३ "सर्वे दोषाकं नाशकं स्मृताः ।" ब. पाठः

विशेषादेषु लिंगेषु यः पठिष्यति पंचसु ।।
पंचभिर्विषयोद्भूतैः स दोषैः परिमुच्यते ।।+ १ २०४

नारद उवाच ।।[२]
निशम्यैवं प्रार्थ्य तेऽपि गुप्तक्षेत्रे मुदान्विताः ।।
पंचलिंगान्यर्चयंतः शिवध्यान पराभवन् ।। २०५

ततो बहुतिथे काले प्रत्यक्षो भूय शंकरः ।।
प्राहतान्मुदितो देवस्तेषां भक्तिविशेषतः ।। २०६

शिव उवाच ।।[३]
बकोलूक गृध्रकूर्मा इन्द्रद्युम्न च पार्थिवः ।।
सारूप्यां मुक्तिमापन्नामल्लोके निवसिष्यथ[४] ।। २०७

लोमशुश्चापि मार्कंडो जीवन्मुक्तो भविष्यतः ।।
इत्युक्ते देवदेवेन लिंगं स्थापितवान्नृपः ।। २०८

इन्द्रद्युम्नेश्वरं नाम महाकालाख्यमित्युत ।।
ज्ञात्वा तीर्थगुणान्राजा कीर्तिमिच्छश्चिरंतनीम्[५] ।। २०९

त्रिरम्यमतुल लिंगं संस्थाप्येदमुवाच ह ।।
यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।। २१०

इन्द्रद्युम्नेश्वरं लिंगं नंदताच्छाश्वतीः समाः ।।
ततस्तथेति भगवाञ्छिवः प्राच्याब्रवीत्पुनः ।। २११

---

+ १ After this sloka, there is written in the M.S.S.-A -
इति श्री स्कंद पुराणे शतरुद्रीय फलं ।
२ ब. नारद उ० ।।
३ अ. ब. "शिव उवाच" नास्ति ।
४ ब. [illegible] ।। ५ अ. ब. [illegible]

अत्र योनि ऽयतं लिंगमैंद्रद्युम्नं प्रपूजयेत् ।।
स गणो जायते नूनं[१] मम लोके निवत्स्यति ।। २१२

इत्युक्त्वा सह तैश्चैव पंचभिः शशिशेखरः ।।
रुद्रलोकमगादेवस्तेऽपि जाता गणाः पुनः ।। २१३

एवं प्रभावो राजाभूदिंद्रद्युम्नो महीपतिः ।।
यजता येन ~~[illegible]~~ वीरेण निर्मितेयं मही ऽनदी ।। २१४

एवं विधः स पुण्योऽयं महीसागर संगमः ।।
अभूत्ततोऽपि संक्षेपातव पार्थ प्रकीर्तितः ।। २१५

स्नात्वात्र संगमे यश्च इन्द्रद्युम्नेश्वरं नरः ।।
पुजयेत्तस्य वासः स्यादुर्ध्वेशः पार्वती पतिः ।। २१६

सर्वबन्धहरं लिंगं गाणपत्यप्रदं त्विदम् ।।
यतो बन्धान्विहायैव स्थापितं तेन फाल्गुन ।। २१७

इतीदमुक्तं तव पुण्यकारि माहात्म्यस्योतमसंगम्स्य ।।
२ * इत्यद्भुत पुण्य मिन्द्रद्युम्नेश्वरस्यापि च पुण्यकारि ।। २१८

३ * इति श्री स्कंदे......शतरुद्रियलिंग माहात्म्येन्द्रद्युम्नेश्वरलिंग माहात्म्य ऽवर्णनं नाम त्रयोदशोऽध्यायः ।।

---

१ अ. प्रतौ "महूयं" इतिस्यात् ।

२ * The last line reads in the M.S.S.-A and B is quite different - It is as under -

पुण्योद्भवं चेंद्रद्युम्नेश्वरस्यः कीर्तियेतस्य पुण्य महत्त्व्यात् ।

३ * अ. इति श्री स्कंदपुराणे......इद्रद्युम्नेश्वर माहात्म्यं ।

ब. इति श्री स्कंदपुराणे महीसागर माहात्म्ये त्रयोदशोध्यायः ।।१३।।